योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०५७

सप्तपञ्चाशः सर्गः ५७

श्रीवसिष्ठ उवाच ।

ततो ददृशतुस्तत्र शवशय्यैकपार्श्वगाम् ।

लीलां विदूरथस्याग्रे मृतां ते प्रथमागताम् ।। १

प्राग्वेषां प्राक्समाचारां प्राग्देहां प्राक्सवासनाम् ।

प्राक्तनाकारसदृशीं सर्वरूपाङ्गसुन्दरीम् ।। २

प्राग्रूपावयवस्पन्दां प्रागम्बरपरीवृताम् ।

प्राग्भूषणभरच्छन्नां केवलं तत्र संस्थिताम् ।। ३

गृहीतचामरां चारु वीजयन्तीं महीपतिम् ।

उद्यच्चन्द्रामिव दिवं भूषयन्तीं महीतलम् ।। ४

मौनस्थां वामहस्तस्थवदनेन्दुतया नताम् ।

भूषणांशुलतापुष्पैः फुल्लामिव वनस्थलीम् ।। ५

कुर्वाणां वीक्षितैर्दिक्षु मालत्युत्पलवर्षणम् ।

सृजन्तीमात्मलावण्यादिन्दुमिन्दुं नभोदितम् ।। ६

नरपालात्मनो विष्णोर्लक्ष्मीमिव समागताम् ।

उदितां पुष्पसंभारादिव पुष्पाकरश्रियम् ।। ७

भर्तुर्वदनके न्यस्तदृष्टिमिष्टविचेष्टिताम् ।

किंचित्प्रम्लानवदनां म्लानचन्द्रां निशामिव ।। ८

ताभ्यां सा ललना दृष्टा तया ते तु न लक्षिते ।

यस्मात्ते सत्यसंकल्पे सा न तावत्तथोदिता ।। ९

श्रीराम उवाच ।

तस्मिन्प्रदेशे सा पूर्वलीला संस्थाप्य देहकम् ।

ध्यानेन ज्ञप्तिसहिता गताभूदिति वर्णितम् ।। १०
किमिदानीं स लीलाया देहस्तत्र न वर्णितः ।
किंसंपन्नः क्व वा यात इति मे कथय प्रभो ।। ११
श्रीवसिष्ठ उवाच ।
क्वासील्लीलाशरीरं तत्कुतस्तस्यास्ति सत्यता ।
केवला भ्रान्तिरेवाभूज्जलबुद्धिर्मराविव ।। १२
आत्मैवेदं जगत्सर्वं कुतो देहादिकल्पना ।
ब्रह्मैऽवानन्दरूपं सद्यत्पश्यसि तदेव चित् ।। १३
यथैव बोधे लीलासौ परिणाममिता क्रमात् ।
परे तथैव तस्मात्तद्धिमवद्गलितं वपुः ।। १४
(आतिवाहिकदेहस्य कालेनाभ्युदितो भ्रमः ।
आधिभौतिकदेहोऽहमिति रज्जुभुजंगवत् ।। १ ।।)
आतिवाहिकदेहेन दृश्यं यदवलोकितम् ।
भूम्यादि नाम तस्यैव कृतं तच्चाधिभौतिकम् ।। १५
वास्तवेन तु रूपेण भूम्याद्यात्माधिभौतिकः ।
न शब्देन न चार्थेन सत्यात्मा शशश्रृङ्गवत् ।। १६
पुंसो हरिणकोऽस्मीति स्वप्ने यस्योदिता मतिः ।
स किमन्विष्यति मृगं स्वमृगत्वपरिक्षये ।। १७
उदेत्यसत्यमेवाशु तथा सत्यं विलीयते ।
भ्रान्तिर्भ्रमवतो रज्वामपि सर्पभ्रमे गते ।। १८
समस्तस्याप्रबुद्धस्य मनोजातस्य कस्यचित् ।
बीजं विना मृषैवेयं मिथ्यारूढिमुपागता ।। १९
स्वप्नोपलम्भं सर्गाख्यं स सर्वोऽनुभवन्स्थितः ।
चिरमावृत्तदेहात्मा भूचक्रभ्रमणं यथा ।। २०
श्रीराम उवाच ।
ब्रह्मँल्लोकैः पुरस्थस्य गच्छतो योगिनो निजम् ।

आतिवाहिकतां देहः कीदृशोऽयं विलोक्यते ।। २१

श्रीवसिष्ठ उवाच ।

देहाद्देहान्तरप्राप्तिः पूर्वदेहं विना सदा ।

आतिवाहिकदेहेऽस्मिन्स्वप्नेष्विव विनश्वरी ।। २२

यथातपे हिमकणः शरद्व्योम्नि सितोऽम्बुदः ।

दृश्यमानोऽप्यदृश्यत्वमित्येवं योगिदेहकः ।। २३

द्रागित्येवाथवा कश्चिद्योगिदेहो न लक्ष्यते ।

योगिभिश्च पुरो वेगात्प्रोड्डीन इव खे खगः ।। २४

स्ववासनाभ्रमेणैव क्वचित्केचित्कदाचन ।

मृतोऽयमिति पश्यन्ति केचिद्योगिनमग्रगाः ।। २५

भ्रान्तिमात्रं तु देहात्मा तेषां तदुपशाम्यति ।

सत्यबोधेन रज्जूनां सर्पबुद्धिरिवात्मनि ।। २६

को देहः कस्य वा सत्ता कस्य नाशः कथं कुतः ।

स्थितं तदेव यदभूदबोधः केवलं गतः ।। २७

श्रीराम उवाच ।

आतिवाहिकतामेति आधिभौतिक एव किम् ।

उतान्य इति मे ब्रूहि येनोह्य इव भोः प्रभो ।। २८

श्रीवसिष्ठ उवाच ।

बहुशो ह्युक्तमेतत्ते न गृह्णासि किमुत्तम ।

आतिवाहिक एवास्ति नास्त्येवेहाधिभौतिकः ।। २९

तस्यैवाभ्यसतोऽप्येति साधिभौतिकतामतिः ।

यदा शाम्यति सैवास्य तदा पूर्वा प्रवर्तते ।। ३०

तदा गुरुत्वं काठिन्यमिति यश्च मुधा ग्रहः ।

शाम्येत्स्वप्ननरस्येव बोद्धुर्बोधान्निरामयात् ।। ३१

लघुतूलसमापत्तिस्ततः समुपजायते ।

स्वप्ने स्वप्नपरिज्ञानादिव देहस्य योगिनः ।। ३२

स्वप्ने स्वप्नपरिज्ञानाद्यथा देहो लघुर्भवेत् ।

तथा बोधादयं देहः स्थूलवत्प्लुतिमान्भवेत् ।। ३३

अनेकदिनसंकल्पदेहे परिणतात्मनाम् ।

अस्मिन्देहे शवे दग्धे तत्रैवास्थितिमीयुषाम् ।। ३४

लघुदेहानुभवनमवश्यं भावि वै तथा ।

प्रबोधातिशयादेति जीवतामपि योगिनाम् ।। ३५

उदितायां स्मृतौ तत्र संकल्पात्माहमित्यलम् ।

यादृशः स भवेद्देहस्तादृशोऽयं प्रबोधतः ।। ३६

भ्रान्तिरेवमियं भाति रज्ज्वामिव भुजङ्गता ।

किं नष्टमस्यां नष्टायां जातायां किं प्रजायते ।। ३७

श्रीराम उवाच ।

अनन्तर ये वास्तव्या लीलां पश्यन्ति ते यदि ।

तत्सत्यसंकल्पतया बुध्यन्ते किमतः प्रभो ।। ३८

श्रीवसिष्ठ उवाच ।

एवं ज्ञास्यन्ति ते राज्ञी स्थितेयमिह दुःखिता ।

वयस्या काचिदन्येयं कुतोऽप्यस्या उपागता ।। ३९

संदेहः क इवात्रैषां पशवो ह्यविवेकिनः ।

यथादृष्टं विचेष्टन्ते कुत एषां विचारणा ।। ४०

यथा लोष्टो लुठद्वृक्षं वञ्चयित्वाशु गच्छति ।

अज्ञानत्वेऽजपशवस्तथा ह्यस्ति पुरादिकम् ।। ४१

यथा स्वप्नवपुर्बोधान्न जाने क्वेव गच्छति ।

असत्यमेव तद्यस्मात्तथैवेहाधिभौतिकम् ।। ४२

श्रीराम उवाच ।

भगवन्स्वप्नशिखरी प्रबोधे क्वेव गच्छति ।

इति मे संशयं छिन्धि शरदभ्रमिवानिलः ।। ४३

श्रीवसिष्ठ उवाच ।

स्वप्नभ्रमेऽथ संकल्पे पदार्थाः पर्वतादयः ।

संविदोऽन्तर्मिलन्त्येते स्पन्दनान्यनिले यथा ।। ४४

अस्पन्दस्य यथा वायोः सस्पन्दोऽन्तर्विशत्यलम् ।

अनन्यात्मा तथैवायं स्वप्नार्थः संविदो मलम् ।। ४५

स्वप्नाद्यर्थावभासेन संविदेव स्फुरत्यलम् ।

अस्फुरन्ती तु तेनैव यात्येकत्वं तदात्मिका ।। ४६

संवित्स्वप्नार्थयोर्द्वित्वं न कदाचन लभ्यते ।

यथा द्रवत्वपयसोर्यथा वा स्पन्दवातयोः ।। ४७

यस्तत्र स्यादिवाबोधस्तदज्ञानमनुत्तमम् ।

सैषासंसृतिरित्युक्ता मिथ्याज्ञानात्मिकोदिता ।। ४८

सहकारिकारणानामभावे किल कीदृशी ।

संवित्स्वप्नपदार्थानां द्विता स्वप्ने निरर्थिका ।। ४१

यथा स्वप्नस्तथा जाग्रदिदं नास्त्यत्र संशयः ।

स्वप्ने पुरमसद्भाति सर्गादौ भात्यसज्जगत् ।। ५०

न चार्थो भवितुं शक्यः सत्यत्वे स्वप्नतोदितः ।

संविदो नित्यसत्यत्वं स्वप्नार्थानामसत्यता ।। ५१

झटित्येव यथाकाशं भवति स्वप्नपर्वतः ।

क्रमेण वा तथा बोधे खं भवत्याधिभौतिकम् ।। ५२

उड्डीनोऽयं मृतो वेति पश्यन्ति निकटस्थिताः ।

ज्ञमातिवाहिकीभूतं स्वस्वभावहता यतः ।। ५३

मिथ्यादृष्टय एवेमाः सृष्टयो मोहदृष्टयः ।

मायामात्रदृशो भ्रान्तिः शून्याः स्वप्नानुभूतयः ।। ५४

स्वप्नानुभूतय इमा मरणान्तबोधे

भ्रान्त्येतरभ्रमदृशः स्फुटसर्गभासः ।

भान्त्यातिवाहिकशरीरगताः समस्ता

मिथ्योदिता मृगनदीसरणक्रमेण ।। ५५

इत्यार्षे श्रीवासिष्ठमहारामायणे मोक्षोपाये उत्पत्तिप्रकरणे लीलो० स्वप्नार्थस्य विचारो नाम सप्तपञ्चाशः सर्गः ।।

५७ ।।